Research Article | Education | E-ISSN No : 2454-9916 | Volume : 11 | Issue : 8 | August 2025

# अहं ब्रह्मास्मि इति भावस्य पूर्वापरस्थितिविमर्शः

Indrani Mandal
Assistant Professor of Sanskrit, Krishnagar Women's College

## ABSTRACT

अहं ब्रह्मास्मीति भावे उदिते सति अज्ञाननाशाज्जीवाः मुक्ताः भवन्ति। परन्तु अज्ञाननाशात् प्राक् ब्रह्मविषये सन्दिहानास्ते आत्मानमेव न जानन्ति। वस्तुतः जगतीह सर्वे जनाः जागतिकत्रिविधदुःखेभ्यः विमुच्य सदानन्दमभिलषन्ति। जगति द्वौ आनन्दौ भवतः– विषयानन्दः स्वरूपानन्दश्च। अहं ब्रह्मास्मीत्यनुभवात् प्राक् जीवः वस्तुगतसुखसागरे निमज्जति, सुखादधिकं दुःखं च समाप्नोति। किन्तु अहं ब्रह्मास्मीत्यनुभवे उदिते सति सच्चिदानन्दस्वरूपे लीयते। सम्प्रति सर्वत्र अत्याचारः हिंसा ईर्षा जुगुप्सा परिदृश्यते। अतः मृत्युकालं यावत् मनुष्यजीवनप्रवाहः अतीव संघर्षेण प्रवहति कालसमुद्रे। अज्ञानात् कर्मप्रवृत्त्या जीवः विषयसमूहे आनन्दस्य अन्वेषणं करोति। किन्तु सः न जानाति यद् सः स्वयमेव नित्यः शुद्धः मुक्तः च भवति। अतः कालसमुद्रे मृत्युकालपर्यन्तं नित्ये आनन्दस्वरूपाधारे संघर्षरहितभावेन सौहार्द्यपूर्णेन जीवनयापनं कर्तुं न शक्नोति। सुतरां भ्रातृत्वपूर्णस्य संघर्षरहितस्य अभेदपूर्णभावस्य समाजस्य परिवारस्य देशस्य स्थापनाय अहं ब्रह्मास्मीति अनुभवस्य प्रयोजनमस्ति।

**KEYWORDS:** मोक्षः, अहम्, ब्रह्मास्मि, वृत्तिज्ञानम्, कर्म, अनुभवः

ननु अहं ब्रह्मास्मीत्यत्र स्वाभाविकतया अहं ब्रह्मासम् उत अहं ब्रह्म स्थास्यामि इति अतीतानागतब्रह्मविषयस्य अस्मद्पदसाहचर्यत्वमस्ति न वेति जिज्ञासायामुत्तरति यदत्र अस्मच्छब्दब्रह्मविषययोः साहचर्यत्वं विद्यते। तर्हि कथं मयि ब्रह्मपदार्थानुभूतेर्प्रागभावः इति चेदुच्यते अज्ञानात्।

अज्ञानविलयाद् हि अहं ब्रह्मास्मीति अनुभवः समुत्पद्यते। किमहमिति केवलं ब्रह्मणं बोधयतीति चेत्तर्हि कैश्चन 'स्थूलोऽहम्, 'कृशोऽहम् इत्याद्यनुभवाच्च स्थूलशरीरमेवाहमिति मन्यते, कैश्चित् 'काणोऽहं', 'बधिरोऽहं' इति इन्द्रियमेव अहमिति मन्यते, केनापि च 'अहं विकल्पवान्', 'अहं संकल्पवान्' इत्याद्यनुभवादात्मानमेव अहमिति उच्यते 'अन्यः अन्तर आत्मा मनोमयः' इत्यादिश्रुतिप्रामाण्यात्, अपरेण तु प्राणाः हि अहमिति कथ्यते 'अहम् अशनायावान्' 'अहं पिपासावान्' इत्याद्यनुभवात् 'अन्यः अन्तर आत्मा प्राणमयः' (तैत्तिरीयोपनिषत् २/२/१) इत्यादिश्रुतिबलाच्च, केनचिद्वा बुद्धिमहमिति ध्वन्यते 'अहं कर्ता, अहं भोक्ता' इत्याद्यनुभवात् "अन्यः अन्तर आत्मा विज्ञानमयः" (तैत्तिरीयोपनिषद् २/४/१) इत्यादिश्रुतेः प्राबल्यात्। अहमज्ञः इत्याद्यनुभवात् अहम् अज्ञानी इति इत्थमपि अनुभूयते कैश्चित्, माम् अहं न जानामि इत्याद्यनुभवात् अज्ञानोपहितं चैतन्यम् अहमिति इत्थं मन्यते केनचित्। वस्तुतस्तु अहमिति पदस्य भावत्वे एवोपयोगो नाभावत्वे अहम् नास्तीत्येवम्। ननु किं तर्हि अनेकार्थकः एकार्थको वा अयमहमिति शब्द इत्यत्र विचारणार्हः।

अहं ब्रह्मास्मि इत्यस्य वाक्यस्य तात्पर्यार्थनिर्णयेण कोऽहमिति विषये ये संशयाः सन्ति तान् दूरीकृत्याहं ब्रह्म इति प्रतिपाद्यते। कथमहं ब्रह्मास्मीत्यस्य वेदान्तवाक्यस्य अद्वितीये ब्रह्मणि अर्थात् जीवब्रह्मैके तात्पर्यनिश्चयोऽस्ति? किमुपायेन तात्पर्यनिर्णयः सम्भवति? बृहत्संहितायामुक्तम् यत् – "उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्य्यनिर्णये"।। इति । अतः उपक्रम–उपसंहार– अभ्यास– अपूर्वता– फल– अर्थवाद–उपपत्तिभिः षड्विधैर्लिङ्गैः तात्पर्यनिर्णयोऽस्ति। वेदान्तसार इति प्रकरणग्रन्थेऽपि उक्तं यत्–"षड्विधलिङ्गैः अशेषवेदान्तानाम् अद्वितीयवस्तुनि तात्पर्य्यावधारणम्" इति । लिङ्गशब्दस्य का व्युत्पत्तिः? लीनम् अर्थं गमयति इति लिङ्गशब्दस्य व्युत्पत्तिः। यदि षड्विधलिङ्गैः सर्वेषां वेदान्तवाक्यानाम् अद्वितीये ब्रह्मणि तात्पर्यनिश्चयः प्रतिपाद्यते तर्हि अहं ब्रह्मास्मीति अनुभूतवेदान्तवाक्यस्य तात्पर्यनिश्चयः तात्पर्यनिर्णयो वा अद्वितीये ब्रह्मणि अर्थात् जीवब्रह्मैक्ये सिध्यति। जीवब्रह्मैक्यस्य अद्वैततत्त्वस्य वा प्रमाणं उपनिषदिति, या खलु श्रुतिप्रस्थानरूपेण परिचिता। अहं ब्रह्मास्मीति अर्थात् जीवब्रह्मैक्यस्य उपलब्धिः सम्भवति वा? अवश्यमेव, "अध्यापारोपापवादौ" इति न्यायेन, तत्त्वमसि इति वाक्यस्य विचारेण दृक्दृश्यविवेकेन च सम्भवति। ब्रह्मानुभवस्य प्रयोजनम् अस्ति मुक्त्यै। लौकिकानां मानवानां 'अहं सुखी' 'अहं दुःखी' 'अहं भोक्ता' 'अहं कर्ता' 'अहं पापी' 'अहम् अध्यापकः अध्यापिका वा' इत्यादयः ये ये अनुभवाश्च शास्त्रोल्लिखिताः, 'अहं ब्रह्मास्मि' इति साधकानां योऽनुभवश्च एतयोः द्वयोः शास्त्रीयलौकिकयोः अनुभवयोः मध्ये कानि कानि वैसादृश्यानि सन्ति कानि सादृश्यानि सन्ति? श्रीरामकृष्णस्य वचने– "अपरिपक्वोऽहं पक्वोऽहम्। साधकः साधनया अपरिपक्वात् पक्वे परिणमते।

### अहं ब्रह्मास्मीति नित्यस्य आखण्डस्य जीवब्रह्मात्मैक्यभावस्य अहं सुखी अहं दुःखी इत्यादेः भावस्य च मध्ये पर्यालोचना दृक्दृश्यविवेकात्

अहं जगत् पश्यामि। जगतः किं पश्यामः? रूपम्। एतत् रूपमिति दृश्यं वस्तु, अत्र द्रष्टा दृक् चक्षुः। तद् चक्षुः यदा दृश्यं भवति, तदा दृक् मनः। मनः मनसः वृत्तिसमूहश्च दृश्यरूपेण अङ्गीक्रियते चेत् तेषां दृक् साक्षीचैतन्यम्। किन्तु साक्षीचैतन्यस्य दृश्यत्वं नास्ति तस्य द्रष्टाभावात् स्वस्यैव दृक्त्वाच्च। यावत् जीवस्य गतिः दृश्येषु वस्तुषु तावत् अहं सुखी अहं दुःखी अहं भोक्ता अहम् अल्पज्ञः इत्यादयः

अनुभवाः जायन्ते। किन्तु यदा जीवस्य गतिः एकमेवाद्वितीयं साक्षीचैतन्यं प्राप्नोति तदा अहं ब्रह्मास्मीति अखण्डाकाराकारिता चित्तवृत्तिः उत्पद्यते। यद्यपि एषा अखण्डाकाराकारिता चित्तवृत्तिः अपरोक्षात् दृश्यं तथापि एतस्मात् दृश्यात् द्रष्टृदृश्ययोः प्रत्यगात्मपदार्थयोःअज्ञानजन्यभेदविनाशिका भवति। एतया चित्तवृत्त्या अज्ञानं नाश्यं स्वयमेव नश्यति।

### अध्यारोपापवादाभ्याम्

अहं सुखी अहं दुःखी इत्यादयः अनुभवाः अध्यारोपेण प्रतिभासिताः भवन्ति। यथा रज्जौ सर्पस्य दर्शनम्। अहं ब्रह्मास्मीति निश्चयः अनुभवः अध्यारोपस्य अपवादेन सिद्धयति।

### तत्त्वमसीत्यनुभवात्

"तत् इति परोक्षत्वविशिष्टः सर्वज्ञः ईश्वरः, "त्वम् इति अपरोक्षत्वविशिष्टः अल्पज्ञः जीवः। एतयोः उभयोः मध्ये एकत्वम् ऐक्यं प्रतिपाद्यते भागलक्षणया। भागलक्षणया तत् इति पदस्य अर्थः भवति शुद्ध चैतन्यं, त्वम् इति पदेनापि शुद्धचैतन्यरूपार्थः अङ्गीकर्तव्यः। अत्रैव जीवब्रह्मैक्यम्। ततः अहमपि ब्रह्म इति उदेति। ततः अहं दुःखी अहं भोक्ता अहं कर्ता अहं अल्पज्ञः इत्यादयः भावाः विनश्यन्ते।

### वृत्तिज्ञानात्

वृत्तिः का? वृत्तिः अन्तःकरणस्य परिणामः। परिणामात् अन्तःकरणवृत्तिरपि चतुर्विधाः। संशयः निश्चयः गर्वः स्मरणमिति। यदा संशयः वृत्तिरूपेण तिष्ठति तदा अन्तःकरणं मनरूपेण परिणमते। तदेव अन्तःकरणं बुद्धिरिति आख्यायते यदा निश्चयः वृत्तिः भवति। यदा च अन्तःकरणवृत्तिः गर्वः इति भवति तदा अन्तःकरणम् अहंकाररूपेण परिणमते। स्मरणस्य वृत्तित्वे च अन्तःकरणं चित्तमिति आख्यायते। विद्यारण्यः मुनीश्वरः वदति यत् "वृत्तयः त्रिधा शान्ता च घोरा च मूढा च" इति । अन्तःकरणस्य जडात्वात् वृत्तिरपि जडा भवति। तथापि सर्वासु वृत्तिषु ब्रह्मणः चित्स्वभावता च ज्ञानस्वभावता च प्रतिबिम्बरूपेण वर्तते एव। श्रुतिरपि वदति यत् – "सत्यं ज्ञानमनन्तं ब्रह्म" इति। सुतरां चैतनस्य ब्रह्मणः वा स्वरूपत्वम् अवच्छेदकत्वं च ज्ञानात्मकम्। अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम्। सुतरां प्रमातृचैतन्यावच्छेदकत्वात् अन्तकरणवृत्तौ ज्ञानत्वस्य अध्यासः भवति। अन्तःकरणवृत्तित्वं ज्ञानत्वं च अन्तःकरणवृत्तिज्ञानत्वम्। अहं सुखी अहं दुःखी अहं भोक्ता अहं कर्ता इत्यादयः यथा वृत्तिज्ञानं तथैव अहं ब्रह्मास्मीत्यपि वृत्तिज्ञानम्। किन्तु उभयोः वृत्तिज्ञानयोः मध्ये किञ्चन वैसादृश्यमस्ति। अहं ब्रह्मास्मीति चिदखण्डाकाराकारितौ चित्तवृत्तौ साक्षिनः चैतन्यस्य ज्ञानत्वस्वरूपता प्रतिपाद्यते। तज्जन्यत्वात् सा वृत्तिः अविद्यायाः तस्याः सर्वासां वृत्तीनां च नाशिका भवति। तत्सादृश्यत्वात् सापि नाश्या भवति। अहं सुखी अहं दुःखी इत्यादौ वृत्तौ अन्तःकरणावच्छिन्नस्य प्रमातृचैतन्यस्य ज्ञानत्वस्य अध्यासात् ताः वृत्तयः कदापि अविद्यायाः नाशिकाः न सन्ति। अहं भोक्ता अहं कर्ता इत्यादीनां सर्वासाम् अन्तःकरणवृत्तीनां विरोधी चिदखण्डाकाराकारिता चित्तवृत्तिः।

### अज्ञानम् अविद्या अपराविद्या–पराविद्याभ्याम्

अज्ञानम्–अविद्या–माया इति इमानि त्रीणि पदानि अद्वेतवेदान्ते प्रायः पर्यायवाचिशब्दरूपेण प्रयुज्यन्ते। पराविद्या अपराविद्या चेति – इमे विद्ये उपनिषत्सु ऋषिभिः प्रोक्ते। उपनिषत्सु आम्नातं यत् –"पराविद्यया अमृतम् अधिगम्यते अपराविद्या च सहायिका" इति । अहं सुखी अहं दुःखी अहं भोक्ता इत्यादयः अपराविद्या भवति। अन्तःकरणावच्छिन्नस्य प्रमातृचैतन्यस्य अवच्छेदकत्वात् ज्ञानत्वात् अन्तकरणवृत्तौ ज्ञानत्वस्य अध्यासात् अपरा विद्या प्रतिपाद्यते। साक्षिचैतन्यस्य अर्थात् अधिष्ठानज्ञानस्य अवच्छेदकत्वात् ज्ञानत्वात् पराविद्या प्रतिपाद्यते। तस्मात् अहं ब्रह्मास्मीति चित्तवृत्तिः उपपद्यते। अस्याः सत्–चित्–अखण्डाकाराकारितायाः चित्तवृत्तेः अमृतरूपा मुक्तिः अधिगम्यते।

### विषय–चैतन्यं प्रमाणचैतन्यं प्रमातृचैतन्यं चेति हेतोः

विषयचैतन्यं प्रमाणचैतन्यं प्रमातृचैतन्यं चेति एभ्यः त्रिविधेभ्यः चैतन्येभ्यः अहं सुखी अहं दुःखी अहं भोक्ता अहं कर्ता इत्यादयः अनुभूयन्ते। किन्तु अहं ब्रह्मास्मीति अखण्डाकाराकारितौ चित्तवृत्तौ एकस्य सतः चितः अखण्डाधिष्ठानचैतन्यस्य अवच्छेदकत्वस्य ज्ञानत्वस्य प्रावल्याधिक्यात् भेदकत्वविशिष्टं प्रतिविम्बितं प्रमाणचैतन्यं प्रमातृचैतन्यं विषयचैतन्यं चेति विनश्यन्ते। तेन सह अहं सुखी अहं दुःखी अहं भोक्ता अहं कर्ता इत्यादयः अन्तकरणवृत्तयः विनश्यन्ते।

### कर्मणः

यावत् पर्यन्तम् अहं सुखी अहं दुःखी अहं भोक्ता अहं कर्ता इत्यादयः अनुभूयन्ते तावत् पर्यन्तं यानि कर्माणि अनुष्ठीयन्ते तानि कर्माणि फलासक्त्या अनुष्ठीयन्ते। तस्मात् हेतोः तानि कर्माणि सकामकर्माणि भवन्ति। मोक्षकामनया शुद्धान्तकरणेन अनुष्ठितानि कर्माणि अपि सकामकर्माणि भवन्ति। किन्तु यदा अहं ब्रह्मास्मीति अखण्डाकाराकारिता चित्तवृत्तिः जाग्रता भवति तदा फलहीनानि आसक्तिहीनानि कर्माणि लोकसंग्रहार्थं कर्तव्यरूपेण अनुष्ठीयन्ते तानि कर्माणि निष्कामकर्माणि भवन्ति।

### सिद्धान्तः

अहं ब्रह्मास्मीति चित्तवृत्तिज्ञानात्:

1. अस्याः चित्तवृत्तेः सत्य–ज्ञानम्–अनन्तम् इति ब्रह्मस्वरूपतायाः अपरोक्षानुभवः भवति।
2. अस्याः चित्तवृत्तेः ब्राह्मी स्थितिः लभ्यते तस्मात् स्थितप्रज्ञः भवति।
3. अस्याः चित्तवृत्तेः लोकसंग्रहार्थं कर्म क्रियते।
4. अस्याः चित्तवृत्तेः जीवन्मुक्तिः लभ्यते।

अहं सुखी अहं दुःखी अहं भोक्ता अहं कर्ता इत्यादिभ्यः अनुभवेभ्यः –

1. एतादृशानुभवावस्थायां कदापि ब्रह्मस्वरूपता नानुभूयते, किन्तु अपराविद्या लभ्यते।
2. अस्याम् अनुभवावस्थायां मोक्षलाभाय चित्तशुद्ध्यर्थं कर्म क्रियते अर्थात् कर्म सकामो भवति, निष्कामः न भवति।
3. अस्यां दशायां ब्रह्मस्वरूपताविषये संशयः तिष्ठति। तस्मात् ब्रह्म इति विषयः तर्क्यते।
4. सर्वजीवकल्याणाय लोकसंग्रहार्थं कर्म न आचर्यते।

जीवे कर्तव्यसंघट्टे धर्मसंघट्टे वा अहं ब्रह्मास्मीति अखण्डाकाराकारिता चित्तवृत्तियुक्ता आध्यात्मिका स्थितबुद्धिरिव कार्याकार्यनिर्णायिका भवति। यस्मिन् समाजे तथा देशे अहं ब्रह्मास्मीति अखण्डाकाराकारिताचित्तवृत्तियुक्ता आध्यात्मिकाः स्थितवुद्धिसम्पन्नाः मनुष्याः अधिकाः भवन्ति सः देशोऽखण्डसाक्षिज्ञानाधारेण

नित्यमुन्नतविष्टरं प्राप्नोति।

**सहायकग्रन्थसूची**


1. श्रीमद्भगवद्गीता– वेदव्यासेन विरचितं पणशीकरोपाह्वविद्वद्व रलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा परिष्कृता संस्कृता च , द्वितीयावृत्तिः , मुम्बापुर्यां पाण्डुरङ्गः जावजी इत्येतैनिर्णयसागराख्यम ुद्रणयन्त्रालयाधिपतिभिः स्वीयेऽङ्कनालये संमुद्य प्रकाशिता ,शाकः १८५८ खीष्टाव्दः १६३६
2. मीमांसादर्शनम् – जैमिनेः विरचितम्, पण्डितेन श्रीभूतनाथेन सप्ततीर्थेन अनूदितम् सम्पादितम्, संस्कृतवुकडिपः इति कलकातायाम्।
3. वेदान्तदर्शनम् – श्रीमन्महर्षिकृष्णद्वेपायनवादरायणभगवद्व ेदव्यासप्रणीतम्, अनुवादकः व्याख्याता च स्वामीविश्वरूपानन्दः , संशोधकसम्पादकौ स्वामी चिद्घनानन्द पुरी वेदान्तवागीशः श्रीआनन्दः झा न्यायाचार्य्यश्च उद्बोधनकार्यालयः, कलकाता।
4. शङ्कराचार्य्यस्य ग्रन्थमाला – श्रीमता यतीश्वर–शङ्कराचार्य्येण प्रणीताः ग्रन्थसमूहः, नानाशास्त्रपरमाचार्य्य–पण्डितप्रवर–श्रीयुक्त–पञ्चानन–तर्करत्नेन सम्पादितम्, वसुमती साहित्यमन्दिरम् ,कलकाता इति।
5. सर्वदर्शन–संग्रहः –सायनमाधवीयेन विरचितम्, श्रीअशोककुमारवन्द्योपाध्यायः सम्पादकः, श्रीवलरामः प्रकाशनी, कलकाता।
6. आर्य्यशास्त्रम् –श्रीश्रीसीतारामदासेन ओङ्कारनाथेन प्रवर्तितम्, श्रीरामः रञ्जन काव्यं व्याकरणतीर्थेन श्रीसीतारामवैदिकमहाविद्यालयात् प्रकाशितम् ,कलकाता।
7. वेदान्तसारः – श्रीसदानन्दयोगीन्द्रसरस्वतीप्रणीतः, प्रकाशकः – स्वामीविश्वनाथानन्दः , उद्बोधनः कार्यालयः।